अजितप्रसाद

(१९५३)

विद्वद्वर्य, धर्मानुरागी, जैनजाति हितेच्छु

पूज्य पिताजी श्रीयुत् पंडित अजितप्रसादजी

आपकी दी हुई दिक्षा और शिक्षा के फल स्वरूप
अजिताश्रम पाठावली की यह छोटी सी
भेट लेकर हम आपके पुत्र
पुत्रियाँ उपस्थित
हुए हैं।
इसे स्वीकार करके
हमको उत्साहित कीजिये कि
आपकी शिक्षा से प्रतिदिन लाभ उठाते
रहें और आपकी दैनिक चर्या का अनुकरण करते रहें।

सरला देवी — शान्तिकुमारी

सुमतिप्रसाद जिन्दल — वीरनन्दन जिन्दल

अभि[illegible] जिन्दल — कैलाशम[illegible] जिन्दल

अनन्त चतुर्दशी २४६१-१९३५.

अजिताश्रम चैत्यालय

२३ जुलाई १९२९ को श्रीमान् जैनधर्मभूषण ब्रह्मचारी शीतलाप्रसादजी चातुर्मास के लिये अजिताश्रम पधारे। २५ जुलाई को बाराबंकी से मूर्ति लाकर अजिताश्रम के कमरे में विराजमान कर दी गई।

इस ही कमरे के नीचे बैठक में छत में बिजली का पङ्खा लगा हुआ था। और वहाँ एक तख़्त पर ब्रह्मचारीजी बैठते, लेटते, सोते थे। और दूसरे तख़्ते पर उनके बराबर श्रीयुत् अजितप्रसादजी काम करते और सोते थे।

प्रतिदिन रात को ३ बजे सुबह से ६ बजे तक श्रीगोम्मटसार जीवकांड, कर्मकांड और आत्मानुशासन के अंगरेजी अनुवाद और टीका का जो श्रीयुत् जुगमन्दिरलाल जैनी का बनाया हुआ था सुधार किया जाता था।

२० सितम्बर, अनन्त-चौदश, को कुएँ से जल लेने के लिये अजिताश्रम में जलयात्रा उत्सव हुआ। अभिषेक हुआ। पूजा हुई। २५ सितम्बर को रात्रि में स्तोत्र, भजन पाठ आदि आधीरात तक हुए।

१ अगस्त को अजिताश्रम चैत्यालय की नींव की पहली ईंट श्रीब्रह्मचारीजी ने जमाई। फिर श्रीयुत् पंडित अजितप्रसाद मुझ अभिनन्दनप्रसाद, मेरी धर्मपत्नी शकुन्तलादेवी, मेरे बड़े भाई सुमतिप्रसादजी की धर्मपत्नी श्रीमती दर्शनमाला, और उनकी पुत्री शारदाकुमारी, (वह खुद I C S. पदप्राप्ति के

लिये लंदन गए हुए थे), मेरी बहन शान्तिकुमारी, मेरे भाई वीरनन्दन और कैलाशभूषण, मेरी भानजी प्रेमलता, मुन्शी जुगमन्धरदास, उनकी धर्मपत्नी और उनके पुत्र निर्मलकुमार ने नींव में ईंट चूना जमाया। मेरी बड़ी बहन श्रीमती सरला-देवी जी, मेरे बहनोई श्रीयुत् बाबू हरिश्चन्द्रजी, और उनकी पुत्री शकुन्तला-देवी उस दिन उन्नाव थे। उस समय वर्षा खूब जोर से हो रही थी और हम लोग छात्रियां लिये स्तोत्र पाठ आदि पढ़ रहे थे, और भीगते भी जाते थे। वह पवित्र समय अजिताश्रम वासियों के जीवन में चिरस्मरणीय रहेगा; इस कारण उस का विस्तरित वर्णन किया गया।

१६ नवम्बर से १८ नवम्बर तक, मंत्र के ८००० जप होकर वेदी-प्रतिष्ठा हुई। चौक की पंचायत ने ब्रह्मचाराजी से आग्रह किया कि अजिताश्रम चैत्यालय के लिये मूर्ति पसन्द कर लें, और बाराबकी की मूर्ति वापस करा दें। ब्रह्मचाराजी ने दो मूर्तियाँ पसन्द कीं।

एक मूर्ति श्वेत पाषाण की, पद्मासन, सुन्दर आकृति, करीब ७५० बरस की प्रतिष्ठित है। घुटनों के बीच के स्थान पर एक लेख है; वह जहाँ तक पढ़ा गया यहां लिखा जाता है:—

संवत् १२२५ जेठ सु
दि १२ देवसहाय तत सुत वि वा
सल षाह ××× पुत्र × × प्रतिष्ठापिता

और आसन के सामने बेल बूटे में छिपा हुआ अर्द्ध चंद्रा-

कार चिह्न है, जिस से यह मूर्ति श्री चन्द्रप्रभ भगवान् की प्रतीत होती है।

दूसरी मूर्ति अत्यन्त प्राचीन है। यह पीतल वा अष्ट धातु की है। आसन के पीछे चार छेद हैं, दो छेदों में एक छत्रमंडल खड़ा हो जाता है, जिस पर सर्प के चिन्ह हैं। यह प्रतिमा पार्श्व प्रभू के नाम से प्रतिष्ठित हुई होगी। दूसरे दो छेदों में भी ऐसा ही मंडलाकार बड़ा छत्र लगता होगा, ऐसा अनुमान है, किन्तु वह मिला नहीं। आसन के नीचे एक छेद बीच में है, इसमें भी फणदार नाग का चिन्ह लगा होगा, ऐसा मालूम पड़ता है। इस पर कोई लेख नहीं है। फूल पत्ती के चिन्ह, अभिषेक पीछे कपड़े से सुखाए जाने की रगड़ से घिस गये हैं। हाथ और शरीर की लम्बाई अच्छी है। यह मूर्ति अर्द्धपद्मासन वा सुखासन है। ऐसीअर्द्धपद्मासन मूर्तियां उत्तर भारत में देखने में नहीं आती हैं; किन्तु शहर हैदराबाद-दाक्षिण के केसरगंज मन्दिर में बीसों प्राचीन मूर्तियां अर्द्धपद्मासन विराजमान हैं। जब भद्रबाहु स्वामी के समय उत्तर भारत में १२ बरस का दुष्काल पड़ा था, तो वह अधिक मुनिसंघ को लेकर दाक्षिण चले गये थे। और जो मुनि यहां रह गए उनको कालदोष से दिगम्बर मुद्रा को छोड़कर वस्त्र धारण करने पड़े। इससे सिद्ध होता है कि दक्षिण में दिगम्बराम्नाय शुद्ध कायम रही, और अर्द्धपद्मासन दिगम्बर मूर्ति शुद्धाम्नाय की है।

यह दोनों मूर्तियाँ चौक के मन्दिर से १२ जनवरी १९२७

को ब्रह्मचारीजी के साथ जाकर बहुत से लोग अजिताश्रम लाये और मंत्र का जप करके चैत्यालय में विराजमान करके मज्जन, अभिषेक, पूजन किया।

विशेष जप, पूजा, हवन आदि १३, १४, १५ जनवरी तक जारी रहा। १५ जनवरी को बृहत् उत्सव हुआ। जल-यात्रा के पश्चात् लखनऊ के सब जैनियों ने मिलकर अभि-षेक पूजन किया और फिर बिरादरी के नर नारियों का जीमन हुआ। सत्यार्थ यज्ञ पुस्तक बाँटी गई।

अब अजिताश्रम चैत्यालय की कुछ विशेषता यहाँ लिखी जाती है।

अभिषेक के सम्बन्ध में ऐसा विचार फैला हुआ है कि स्त्री को जिन प्रतिमा अभिषेक करने का अधिकार नहीं है। युक्ति यह दी जाती है कि स्त्री का शरीर सदा अशुद्ध रहता है। यह युक्ति समझ में नहीं आती। और बहुत से स्थानों में स्त्रियां अभिषेक पूजन करती है। अतः इस विषय में पूर्णतया विचार-पूर्वक स्त्रियों को जिन-प्रतिमा-अभिषेक और पूजन का अधिकार अजिताश्रम-चैत्यालय में प्राप्त है। और वह इस अधिकार से लाभ उठाती हैं।

अजिताश्रम-चैत्यालय में वेदी में एक ही प्रतिमा विराज-मान है। और जिनेन्द्र की वैराग्य छवि और ध्यानमुद्रा के दर्शन में विघ्न के कारण शीशे और रंगारंग के बेलबूटे आदि वस्तु नहीं हैं।

अजिताश्रम-चैत्यालय में दर्शकों की सुविधा के वास्ते बिजली की रौशनी और छत के पंखे का भी प्रबंध है।

अजिताश्रम चैत्यालय में स्थापना केसरिया चावल की जगह लौंग से की जाती है। लौंग पुष्प है। उसकी सूरत भी पुष्प की है। वह स्वतः सुगन्धित है। स्थापना की लौंग का दहन संस्कार भले प्रकार सुगमता से जल्दी हो जाता है, और चावल मुश्किल से देर में जलते हैं। अखंड चावल स्थापना करते करते खण्डित होजाते हैं, लौंग खण्डित नहीं होती।

पूजा की सामग्री थोड़ी चढ़ाई जाती है। और या तो उसका हवन, या नदी में प्रवाह कर दिया जाता है, या किसी ब्राह्मण आदि को खाने को दे दी जाती है।

नित्य पूजा विधि इस प्रकार है कि थाली के बीच में १ या ३ स्वस्तिका देव-गुरुशास्त्र के स्थापना रूप, ऊपर अर्द्ध चन्द्र ‿ सिद्धशिला के चिह्न स्वरूप, और दश दिशाओं में स्वस्तिका या बिन्दु दश दिशा वा दश दिकपाल के संकेत रूप बनाये जाते हैं और इन्हीं पर अष्ट द्रव्यादि अर्घ्य चढ़ाये जाते हैं, जिससे थाली में सामग्री का बेढंगा ढेर सा नहीं हो जाता है, बल्कि थाली सुसज्जित नजर आती है। देवपूजा सम्बंधित ६४ ऋद्धियों के १० श्लोक पढ़ते समय

प्रत्येक श्लोक पर लौंग चढ़ाई जाती है और लौंगों की शोभनीक रेखा सिद्ध शिला के नीचे बन जाती है।

यदि ऊपर लिखी बातें अनुचित हों, तो विज्ञजन युक्ति और प्रमाण सहित लिखकर मुझे अनुगृहीत करें।

चैत्यालय का खर्च अजिताश्रम से होता है। अब तक चैत्यालय के धर्मकोष में आया हुआ दानद्रव्य १६६|||-)। ट्रेडिंग ऐण्ड बैंकिंग हाउस लखनऊ में जमा है।

यह पुस्तक यथाशक्ति शुद्ध करके प्रकाशित की गई है। किन्तु तब भी कुछ अशुद्धियां रह गई हैं। कहीं कहीं जो हिन्दी पाठ छपी और लिखित पोथियों में मिला उस का अर्थ स्पष्ट समझ में नहीं आया। जैसा पृष्ठ ४२ पर "तिहा यत" शब्द सत्यधर्म की स्तुति मे। देव-शास्त्र-गुरु-पूजा का चतुर्विंशति जिन स्तवन, और प्राकृत की तीनों जयमाल नहीं छापी गई हैं। चौबीस तीर्थंकरों की नामावली पहले ही आ चुकी है; और प्राकृत भाषा प्रायः समझ में नहीं आती है।

श्रीस्वामी पद्मनन्दी आचार्य कृत सिद्ध पूजा के भावाष्टक और द्रव्याष्टक पृष्ठ १८ पर आमने सामने छाप दिये गये हैं, जिस में उपासक की जैसी इच्छा हो वैसा अष्टक पढ़े।

यदि इस पुस्तक से जो धर्म प्रचारार्थ लागत के दाम पर ही दी जायगी, जैन जनता का उपकार हुआ, तो दूसरी आवृत्ति अधिक प्रयत्न करके प्रकाशित की जायगी।

अजिताश्रम लखनऊ ११-६-३५ अभिनन्दनप्रसाद जिन्दल

श्रीजिनाय नम

सुप्रभात स्तोत्र

यत्स्वर्गावतरोत्सवे यदभवज्जन्माभिषेकोत्सवे ।
यद्दीक्षा-ग्रहणोत्सवे यदखिलज्ञान-प्रकाशोत्सवे ।
यन्निर्वाण-गमोत्सवे जिनपतेः पूजाद्भुत तद्भवै ।
सङ्गीत स्तुति-मङ्गलै प्रसरतां मे सुप्रभातोत्सवः ॥ १ ॥
सुप्रभातं सुनक्षत्रं श्रेयः प्रत्यभिनन्दितम् ।
देवता ऋषयः सिद्धाः सुप्रभातं दिने-दिने ॥ २ ॥
सुप्रभातं तवैकस्य वृषभस्य महात्मनः ।
येन प्रवर्तितं तीर्थं भव्य-सत्व-सुखावहम् ॥ ३ ॥
सुप्रभातं जिनेन्द्राणां ज्ञानोन्मीलित-चक्षुषाम् ।
अज्ञान-तिमिरान्धानां नित्यमस्तमितो रविः ॥ ४ ॥
सुप्रभातं जिनेन्द्रस्य वीरः कमल लोचनः ।
येन कर्माटवी दग्धा शुक्लध्यानोग्रवह्निना ॥ ५ ॥
सुप्रभातं सुनक्षत्रं सुकल्याणं सुमङ्गलम् ।
त्रैलोक्य हित-कर्तॄणां जिनानामेव शासनम् ॥ ६ ॥

दर्शन पाठ

अद्य मे सफलं जन्म नेत्रे च सफले मम।
त्वामद्राक्षं यतो देव हेतुमक्षय - सम्पदः ॥ १ ॥
अद्य संसार गम्भीर पारावारः सुदुस्तरः।
सुतरोऽयं क्षणेनैव जिनेन्द्र तव दर्शनात् ॥ २ ॥
अद्य मे क्षालितं गात्रं नेत्रे च विमले कृते।
स्नातोऽहं धर्मतीर्थेषु जिनेन्द्र तव दर्शनात् ॥ ३ ॥
अद्य मे सफलं जन्म प्रशस्तं सर्वमङ्गलम्।
संसारार्णवतीर्णोऽहं जिनेन्द्र तव दर्शनात् ॥ ४ ॥
अद्य कर्माष्टकज्वालं विधूतं सकषायकम्।
दुर्गतेर्विनिवृत्तोऽहं जिनेन्द्र तव दर्शनात् ॥ ५ ॥
अद्य सौम्याग्रहाः सर्वे शुभाश्चैकादशस्थिता।
नष्टानि विघ्नजालानि जिनेन्द्र तव दर्शनात् ॥ ६ ॥
अद्य नष्टो महाबन्ध कर्मणां दुःखदायकः।
सुखसङ्गं समापन्नो जिनेन्द्र तव दर्शनात् ॥ ७ ॥
अद्य कर्माष्टकं नष्टं दुखोत्पादनकारकम्।
सुखाम्भोधिनिमग्नोऽहं जिनेन्द्र तव दर्शनात् ॥ ८ ॥
अद्य मिथ्यान्धकारस्य हन्ताज्ञान-दिवाकरः।
उदितो मच्छरीरेऽस्मिन् जिनेन्द्र तव दर्शनात् ॥ ९ ॥
अद्याहं सुकृतीभूतो निर्धूताशेष-कल्मषः।
भुवनत्रय-पूज्योऽहं जिनेन्द्र तव दर्शनात् ॥ १० ॥

अष्टाष्टकं पठेद्यस्तु गुणानन्दित-मानसः ।
तस्य सर्वार्थसंसिद्धि जिंनेन्द्र तव दर्शनात् ॥ ११ ॥

दर्शन पाठ २

दर्शनं देव देवस्य दर्शनं पाप नाशनं ।
दर्शनं स्वर्ग सोपानं दर्शनं मोक्षसाधनं ॥ १ ॥
दर्शनेन जिनेन्द्राणाम् साधूनां वंदनेन च ।
न चिरं तिष्ठते पापं छिद्रहस्ते यथोदकं ॥ २ ॥
वीतराग मुख दृष्ट्वा पद्मराग समप्रभं ।
जन्म-जन्म-कृतं पापं दर्शनेन विनश्यति ॥ ३ ॥
दर्शनं जिनसूर्यस्य संसार-ध्वांत-नाशनं
बोधनं चित्त-पद्मस्य समस्तार्थ-प्रकाशनं ॥ ४ ॥
दर्शनं जिन चन्द्रस्य सद्धर्मामृतवर्षनं
जन्मदाघ विनाशाय वर्द्धनं सौख्य वारिधे ॥ ५ ॥

जीवादि तत्व प्रतिदर्शकाय
सम्यक्त्व-मुख्याष्ट- गुणाश्रयाय
प्रशान्ति-रूपाय दिगम्बराय
देवाधिदेवाय नमो जिनाय ॥ ६ ॥

चिदानंदैक-रूपाय, जिनाय, परमात्मने
परमात्म-प्रकाशाय नित्यम् सिद्धात्मने नमः ॥ ७ ॥
अन्यथा शरणं नास्ति, त्वमेव शरणं मम
तस्मात् कारुण्य भावेन रक्ष रक्ष जिनेश्वर ॥ ८ ॥
नहि त्राता नहि त्राता नहि त्राता जगत्रये
वीतरागसमो देवो न भूतो न भविष्यति ॥ ९ ॥
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने
सदामेस्तु सदामेस्तु सदामेस्तु भवे भवे ॥ १० ॥
जिन धर्माद् विनिर्मुक्तो माभवच्चक्रवर्त्यपि
शान्त-चित्तो दरिद्रोपि जिन धर्म-निवासितः ॥ ११ ॥
जन्म-जन्म कृतं पापं जन्म-कोटिमुपार्जितं
जन्म मृत्युर्जरातंकं हन्यते जिन दर्शनात् ॥ १२ ॥

अभिषेक पाठ

श्रीमज्जिनेन्द्रमभिवंद्य जगन्त्रयेशं,
स्याद्वाद - नायकमनन्तचतुष्टयार्हम् ।
श्रीमूल-संघ-सुदृशां सुकृतैक-हेतु-
जैनेन्द्र, यज्ञ विधिरेष मयाभ्यधायि ॥ १ ॥

(यह पढ़कर पुष्पाजलि क्षेपण करना)

सौगन्ध्य-संगत-मधुव्रत झंकृतेन,
संवर्ण्यमानमिव गन्धमनिन्द्यमादौ।
आरोपयामि विबुधेश्वरवृन्द-वन्द्य,
पादारविन्दमभिवन्द्यजिनोत्तमानाम्॥ २॥
(यह पढकर अपने ललाटादि स्थानों में तिलक लगाना)
ये सन्ति केचिदिह दिव्य-कुल-प्रसूता,
नागाः प्रभूतबलदर्पयुताविबोधाः।
संरक्षणार्थममृतेन शुभेन तेषां,
प्रक्षालयामि पुरतः स्नपनस्य भूमिम्॥ ३॥
(यह पढकर अभिषेक के लिये आगे की भूमि का प्रक्षालन करना)
क्षीरार्णवस्य पयसा शुचिभिःप्रवाहैः,
प्रक्षालितं सुरवरैर्यदनेकवारम्।
अत्युद्‌यमुद्यतमहं जिनपादपीठं,
प्रक्षालयामि भवसंभवतापहारि॥ ४॥
(जिस प्रक्षालित आसन पर विराजमान करके अभिषेक करना हो उस पर 'श्री' वर्ण लिखना)
इन्द्राग्नि दण्ड-धर-नैऋत-पाशपाणि-
वायूत्तरेश-शशि मौलि फणीन्द्र चन्द्राः
आगत्य यूयमिह सानुचराः सचिन्हाः,
स्वं स्वं प्रतीच्छत बलिं जिनपाभिषेके॥ ५॥
(दश दिशाओ मे निम्नलिखित मंत्र पढकर दश दिक्पाल स्थापन करना)

१. ॐ आं क्रौं ह्रीं इन्द्र आगच्छ आगच्छ, इन्द्राय स्वाहा।

२. ॐ अग्ने आगच्छ आगच्छ, अग्नये स्वाहा।

३. ॐ यम आगच्छ आगच्छ, यमाय स्वाहा।

४. ॐ नैऋत आगच्छ आगच्छ, नैऋताय स्वाहा।

५. ॐ वरुण आगच्छ आगच्छ, वरुणाय स्वाहा।

६. ॐ पवन आगच्छ आगच्छ, पवनाय स्वाहा।

७. ॐ कुवेर आगच्छ आगच्छ, कुवेराय स्वाहा।

८. ॐ ऐशान आगच्छ आगच्छ, ऐशानाय स्वाहा।

९. ॐ धरणीन्द्र आगच्छ आगच्छ, धरणीन्द्राय स्वाहा।

१०. ॐ सोम आगच्छ आगच्छ, सोमाय स्वाहा।

यः पाण्डुकामलशिलागतमादिदेव-
मस्नापयन्सुरवरा सुरशैलमूर्ध्नि।
कल्याणमीप्सुरहमक्षत-तोय-पुष्पैः
संभवायामि पुर एव तदीय विम्वम ॥ ६ ॥

('श्री' वर्ण पर जिनविम्व को स्थापना करना)

सत्पल्लवार्चित मुखान्कलधौतरूपय-
ताम्रार-कूट-घटितान्पयसा सुपूर्णान्।
संवाह्यतामिव गतांश्चतुरः समुद्रान्,
संस्थापयामि कलशान् जिन वेदिकान्तेः ॥ ७ ॥

(वेदी के कोनो में चार कलशों की स्थापना करना)

आभिः पुण्याभिरद्भिः परिमलबहुलेनामुना चन्दनेन,
श्रीदृक्पेयैरमीभिः शुचिरुदकचयैरुद्गमैरेभिरुद्धैः।
हृद्यैरेभिर्निवेद्यैर्मखभवनमिमैर्दीपयद्भिः प्रदीपै
र्धूपैः प्रायोभिरेभिः पृथुभिरपि फलैरेभिरीशं यजामि।८।

(यह पढकर अर्घ्य चढ़ाना)

दूरावनम्रसुरनाथ किरीट-कोटी-
संलग्नरत्नकिरणच्छवि धूसरांघ्रिम्।
प्रस्वेदतापमलमुक्तमपि प्रकृष्टे
र्भक्त्या जलैर्जिनपतिं बहुधाभिषिञ्चे ॥ ९ ॥

(शुद्ध जल की धारा प्रतिमा पर छोड़ना)

भक्त्या ललाट तट देशनिवेशितोच्चै-
र्हस्तैश्च्युता सुरवरा-सुरमर्त्यनाथैः।
तत्काल-पीलित महेक्षु-रसस्य धारा,
सद्यः पुनातु जिनबिम्बगतैव युष्मान्॥ १० ॥

(इक्षुरस की धारा०)

उत्कृष्ट वर्ण नवहेमरसाभिराम,
देहप्रभावलयसंगमलुप्तदीप्तिम्।
धारां घृतस्य शुभगन्ध गुणानुमेयां,
वन्देऽर्हतां सुरभि संस्नपनोपयुक्ताम्॥ ११ ॥

(घृतरस की धारा०)

संपूर्णशारदशशांक-मरीचि-जाल,
स्यन्दैरिवात्मयशसामिव सुप्रवाहैः ।
क्षीरैर्जिनाः शुचितरैरभिषिच्यमाणाः,
संपादयन्तु मम चित्त-समीहितानि ॥ १२ ॥

(दुग्धरस की धारा०)

दुग्धाब्धि-वीचि-पयसांचित-फेनराशि,
पाण्डुत्वकान्तिमवधारयतामतीव ।
दध्नां गता जिनपतेः प्रातिमां सुधारा,
संपद्यतां सपदिवाञ्छित-सिद्धये वः ॥ १३ ॥

(दही की धारा०)

संस्नापितस्य घृतदुग्धदधीक्षुवाहैः,
सर्वाभिरौषधिभिरर्हतमुज्ज्वलाभिः ।
उद्वर्तितस्य विदधाम्यभिषेक मेला,
कालेय कुंकुम रसोत्कट वारिपूरैः ॥ १४ ॥

(सर्वौषधिरस की धारा०)

इष्टैर्मनोरथशतैरिव भव्य पुंसां,
पूर्णैः सुवर्ण कलशैर्निखिलैर्वसानैः ।
संसार-सागर-विलंघन-हेतु-सेतु-
माप्लावये त्रिभुवनैकपतिं जिनेन्द्रम् ॥ १५ ॥

(कलशो से अभिषेक)

द्रव्यैरनल्प घनसार चतुः समाद्यै
रामोदवासितसमस्तदिगन्तरालैः ।
मिश्रीकृतेन पयसा जिनपुंगवानां
त्रैलोक्य-पावनमहं स्नपनं करोमि ॥ १६ ॥

(सुगधित जल की धारा०)

मुक्ति-श्रीवनिता-करोदकमिदं पुण्याकुरोत्पादकं
नागेन्द्र-त्रिदशेन्द्र-चक्र-पदवी राज्याभिषेकोदकम् ।
सम्यग्ज्ञान-चारित्रदर्शनलता-संवृद्धि-संपादकं
कीर्ति-श्री-जय साधकं तव जिन स्नानस्यगन्धोदकम् ॥१७॥

(गन्धोदक मस्तक पर लगाना)

निर्मलं निर्मलीकरण पवित्रं पापनाशनम् ।
जिन गन्धोदकम् वन्दे सर्व-पाप-प्रणाशनम् ॥

(गन्धोदक लगाना)

देव शास्त्र गुरु पूजा

ॐ जय जय जय । नमोऽस्तु नमोऽस्तु नमोऽस्तु ।
णमो अरिहंताणं, णमो सिद्धाणं, णमो आयरियाणं,
णमो उवज्झायाणं, णमो लोए सव्व साहूणं ॥
ॐ अनादि-मूल-मन्त्रेभ्यो नमः

(पुष्प चढाना)

चत्तारि मंगलं, अरहंत मंगलं, सिद्ध मंगलं, साहू मंगलं, केवलिपण्णतो धम्मो मंगलं । चत्तारि लोगुत्तमा, अरहंत लोगुत्तमा, सिद्ध लोगुत्तमा, साहू लोगुत्तमा, केवलिपण्णतो धम्मो लोगुत्तमा । चत्तारि सरणं पव्वज्जामि, अरहंत सरणं पवज्जामि, सिद्ध सरणं पवज्जामि, साहू सरणं पवज्जामि केवलिपण्णतो धम्मो सरणं पवज्जामि ॥

(पुष्पांजलि क्षेपण करना)

अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा ।
ध्यायेत्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥ १ ॥
अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।
यः स्मरेत्परमात्मानं स वाह्याभ्यन्तरे शुचिः ॥२॥
अपराजित मन्त्रोयं सर्वविघ्नविनाशनः ।
मंगलेषु च सर्वेषु प्रथमं मंगलं मतः ॥ ३ ॥
अर्हमित्यक्षरं ब्रह्मवाचकं परमेष्ठिनः ।
सिद्धचक्रस्यसद्बीजं सर्वतः प्रणमाम्यहम् ॥४॥
कर्माष्टक विनिर्मुक्तं मोक्षलक्ष्मीनिकेतनम् ।
सम्यक्त्वादि गुणोपेतं सिद्ध चक्रं नमाम्यहम् ॥५॥
विघनौघाः प्रलयं यान्तु शाकिनी भूत पन्नगाः ।
विषं निर्विषताम यान्तु स्तूयमाने जिनेश्वरे ॥६॥

(पुष्प क्षेपण करना)

उदक-चन्दन-तन्दुल-पुष्पकैश्चरुसुदीप सुधूप फलार्घ्यकै ।
धवल मङ्गलगानरवाकुले जिनगृहे जिननाथ महं यजे ॥ ७ ॥

ॐ श्रीभगवज्जिन सहस्र नामभ्योऽर्घ्यं निर्वपामीति स्वाहा ॥

श्री मज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं
स्याद्वाद-नायकमनन्त-चतुष्टयार्हम् ।
श्रीमूल संघसुदृशां सुकृतैक-हेतु-
र्जैनेन्द्र-यज्ञविधिरेषमया व्यधायि ॥
स्वस्ति त्रिलोक-गुरवे जिनपुङ्गवाय
स्वस्ति स्वभाव महिमोदय सुस्थिताय ।
स्वस्ति प्रकाश सहजोर्ज्जित दृङ्मयाय
स्वस्ति प्रसन्नललिताद्भुतवैभवाय ॥
स्वस्त्युच्छलद्विमल बोध सुधाप्लवाय
स्वस्ति स्वभाव परभाव-विभासकाय ।
स्वस्तित्रिलोक-विततैक-चिदुद्गमाय
स्वस्ति त्रिकालसकलायत विस्तृताय ॥
द्रव्यस्य शुद्धिमधिगम्य यथानुरूपं ।
भावस्य शुद्धिमधिकामधिगन्तु-कामः ॥
आलंवनानि विविधान्यवलम्ब्य वल्गन् ।
भूतार्थ-यज्ञ-पुरुषस्य करोमि यज्ञम् ॥
अर्हत्पुराण पुरुषोत्तम पावनानि,
वस्तून्यनूनमखिलान्ययमेकएव
अस्मिन ज्वलद्विमलकेवल-बोध-वह्नौ ।
पुण्य समग्रमहमेकमना जुहोमि ॥

श्री वृषभो नमः स्वस्ति, स्वस्ति श्री अजितः ।
श्री संभवः स्वस्ति, स्वस्ति श्री अभिनन्दनः,
श्री सुमितः स्वस्ति, स्वस्ति श्री पद्मप्रभः
श्रीसुपार्श्वः स्वस्ति, स्वस्ति श्रीचन्द्रप्रभः ।
श्रीपुष्पदन्तः स्वस्ति, स्वस्ति श्री शीतलः
श्रीश्रेयान्स स्वस्ति, स्वस्ति श्री वासुपूज्यः ।
श्री विमलः स्वस्ति स्वस्ति श्री अनन्तनाथः
श्री धर्मः स्वस्ति, स्वस्ति श्री शान्तिनाथ. ।
श्री कुन्थुः स्वस्ति, स्वस्ति श्री अर नाथः ।
श्री मल्लिः स्वस्ति, स्वस्ति श्री मुनिसुव्रतः ।
श्री नमि स्वस्ति, स्वस्ति श्री नेमिनाथः
श्री पार्श्वः स्वस्ति, स्वस्ति श्री वर्धमानः ।

(पुष्पाञ्जलि क्षेपण)

नित्याप्रकम्पाद्भुत केवलौघाः स्फुरन्मनः पर्य्यय शुद्ध बोधाः ।
दिव्या वधिज्ञान बलप्रबोधाः स्वस्ति क्रियासुः परमर्षयो नः ॥
कोष्ठस्थ धान्योपममेकबीजं संभिन्न संश्रोत्र-पदानुसारि ।
चतुर्विधं बुद्धिबलं दधानाः, स्वस्ति क्रियासुः परमर्षयो नः ॥
संस्पर्शनं संश्रवणं च दूरादास्वादन-घ्राण-विलोकनानि ।
दिव्यान्मतिज्ञान बलाद्वहन्तः स्वस्ति क्रियासुः परमर्षयो नः॥
प्रज्ञा प्रधानाः श्रमणाः समृद्धः प्रत्येकबुद्धा दशसर्वपूर्वैः ।
प्रवादिनोऽष्टांग निमित्त विज्ञाः स्वस्ति क्रियासुः परमर्षयो नः।

जंघावलिश्रेणिफलाम्बुतन्तु प्रसून-बीजांकुर चारणाव्हा ॥
नभोऽङ्गणस्वैर विहारिणश्च स्वस्ति क्रियासुः परमर्षयो नः ।
अणिम्निदक्षाःकुशला महिम्नि, लघिम्नि शक्ता कृतिनोगरिम्णि
मनोवपुर्वाग् बलिनश्च नित्यं स्वस्ति क्रियासुः परमर्षयो नः ॥
सकाम रुपित्व वशित्वमैश्य प्राकाम्यमन्तर्द्धिमथाप्तिमाप्ताः ॥
तथाऽप्रतीघातगुणप्रधानाः स्वस्ति क्रियासुः परमर्षयोनः।
दीप्तं च तप्तं च तथा महोग्रं घोरं तपो घोर पराक्रमस्थाः ।
ब्रह्मापरं घोरगुणाश्चरन्तः स्वस्ति क्रियासुः परमर्षयो नः ॥
आमर्ष सर्वौषधयस्तथाशीविर्षविषाद्दष्टिविषं विषाश्च ।
सखिल्ल विडजल्ल मलौषधीशाःस्वस्ति क्रियासुःपरमर्षयो नः ॥
क्षीरं स्रवन्तोऽत्रघृतंस्रवन्तोमधुस्रवन्तो प्यमृतं स्रवन्तः ।
अक्षीण संवास-महानसाश्च स्वस्ति क्रियासुः परमर्षयो नः ॥

सार्वः सर्वज्ञनाथः सकलतनुभृतां पाप सन्ताप हर्ता ।
त्रैलोक्याक्रान्त कीर्तिः क्षतमदनरिपुर्घातिकर्मप्रणाशः
श्रीमान्निर्वाण सम्पद्वरयुवतिकरालीढकण्ठः सुकण्ठैः
देवेन्द्रैर्वन्द्यपादो जयतु जिनपतिः प्राप्त कल्याणपूजः ॥
जय जय जय श्री सत्कान्ति प्रभो जगतां पते ।
जय जय भवानेव स्वामी भवाम्भसि-मज्जताम् ॥
जय जय महामोहध्वान्तप्रभात-कृतेऽर्चनं ।
जय जय जिनेश त्वं नाथ प्रसीद करोम्यहम् ॥

ॐ ह्रीं भगवज्जिनेन्द्र ! अत्र अवतर अवतर संवौषट्

ॐ ह्री भगवज्जिनेन्द्र ! अत्र तिष्ट तिष्ठ ठः ठः
ॐ ह्री भगवज्जिनेन्द्र ! अत्र मम सन्निहितो भव भव वषट
(इति स्थापनम्)

देवि श्री श्रुत-देवते भगवति त्वत्पादपंकेरुह
द्वन्देयामि शिलीमुखत्वमपरं भक्त्यामयाप्रार्थ्यते ।
मातश्चेतसि तिष्ठ मे जिनमुखोद्भुते सदा त्राहि मां ।
दृग्दानेन मयि प्रसीद भवतीं सम्पूजयामोऽधुना ।

ॐ ह्री जिनमुखोद्भूत स्याद्वाद-नय-गर्भित द्वादशाङ्ग श्रुतज्ञान ! अत्र अवतर अवतर संवौषट
ॐ ह्री जिनमुखोद्भूत स्याद्वाद-नय-गर्भित द्वादशाङ्ग श्रुतज्ञान अत्र तिष्ट तिष्ठ ठ ठः
ॐ ह्री जिनमुखोद्भूत स्याद्वाद-नय-गर्भित द्वादशाङ्ग श्रुतज्ञान ! अत्र ममसन्निहितो भव भव वषट
(इति स्थापनम्)

संपूजयामि पूज्यस्य पादपद्मं युगं गुरोः ।
तपः प्राप्त प्रतिष्ठस्य गरिष्ठस्य महात्मनः ॥

ॐ ह्री श्री सम्यक् दर्शन सम्यक् ज्ञान सम्यक् चारित्रादि गुण विराजमान आचार्योपाध्याय सर्वसाधुसमूह, अत्र अवतर अवतर संवौषट ।

ॐ ह्री श्री सम्यक् दर्शन सम्यक् ज्ञान सम्यक् चारित्रादि गुण विराजमान आचार्योपाध्याय सर्वसाधुसमूह, अत्र तिष्ठ तिष्ठ ठ ठ ।

ॐ ह्री श्री सम्यक दर्शन सम्यक् ज्ञान सम्यक् चारित्रादि गुण विराजमान आचार्योपाध्याय सर्वसाधुसमूह, अत्र मम सन्निहिता भव भव वषट ।

(इति स्थापनम्)

देवेन्द्र नागेन्द्र नरेन्द्र वन्द्यान् शुम्भत्पदान शोभित सार वर्णान् ।
दुग्धाब्धि-संस्पर्धि गुणैर्जलौघै र्जिनेन्द्र सिद्धान्त यतीन् यजेहम्

ओ३म् ह्रीं परब्रह्मणे अनन्तानन्तज्ञानशक्तये अष्टादशदोष रहिताय षट-चत्वारिंशत्गुणसहिताय अर्हतपरमेष्ठिने जन्म जरामृत्यु विनाशनाय जलं निर्वपामीति स्वाहा

ओ३म् ह्रीं श्री जिन मुखोद्भूत स्याद्वाद-नय गर्भित द्वादशांग श्रुतज्ञानाय जन्मजरामृत्यु विनाशनाय जल निर्वपामीति स्वाहा ।

ओ३म् ह्रीं सम्यक्दर्शन सम्यक्ज्ञान सम्यक् चारितादि गुण विराजमान आचार्योपाध्याय सर्वसाधु समूहेभ्य: जन्मजरामृत्यु विनाशनाय जल निर्वपामीति स्वाहा ।

ताम्यत्त्रिलोकोदरमध्यवर्ति समस्तसत्वाहितहारिवाक्यान् ।
श्रीचन्दनैर्गन्धविलुब्धभृङ्गै र्जिनेन्द्र सिद्धायन्तयतीन् यजेहम्

ओ३म् ह्रीं देवशास्त्रगुरुभ्यो भवातापविनाशाय चदनं निर्वपामीति स्वाहा ।

अपार संसार महासमुद्र-प्रोत्तारणे प्राज्यतरीन् सुभक्त्या
दीर्घाक्षताङ्गैर्धवलाक्षतौघैः जिनेन्द्र सिद्धान्त यतीन् यजेहम् ॥

ओ३म् ह्रीं देवशास्त्रगुरुभ्यो क्षुधारोगविनाशनाय अक्षतान् निर्वपामीति स्वाहा ।

विनीतभव्याब्जविबोधसूर्यान् वर्यान् सुचर्य्यानकथनैकधुर्य्यान्
कुन्दारविन्दप्रमुखैःप्रसूनै र्जिनेन्द्र सिद्धान्तयतीन् यजेहम् ॥

ओ३म् ह्रीं देवशास्त्रगुरुभ्यो कामवाणविनाशनाय पुष्प निर्वपामीति स्वाहा

कुदर्पकन्दर्प विसर्प सर्पत्प्रसह्य निर्णाशन वैनतेयान् ।
प्राज्याज्य सारैश्चरुभिःरसाढ्यै र्जिनेन्द्र सिद्धान्तयतीन् यजेहम् ॥

ओ३म ह्रीं देवशास्त्रगुरुभ्यो क्षुधारोग विनाशनाय नैवेद्य निर्वपामीति स्वाहा

ध्वस्तोद्यमान्धीकृत विश्वविश्व मोहान्धकार प्रतिघातदीपान् ।
दीपैः कनत्कांचन भाजनस्थै जिनेन्द्र सिद्धान्तयतीन् यजेहम्

ओ३म ह्रीं देवशास्त्र गुरुभ्यो मोहांधकार विनाशनाय दीप निर्वपामीति स्वाहा ।

दुष्टाष्ट कर्मेन्धन पुष्ट जाल संधूपने भासुर धूम केतून् ।
धूपैर्विधूतान्य सुगन्धगन्धै जिनेन्द्र सिद्धान्तयतीन् यजेहम् ।

ओ३म् ह्रीं देवशास्त्रगुरुभ्यो अष्टकर्म-दहनाय धूपं निर्वपामीति स्वाहा ।

लुभ्यद्विलुभ्यन्मन सामागम्यान् कुवादिवादा स्खलितप्रभावान्
फलैरलं मोक्षफलाभिसारै जिनेन्द्र सिद्धान्त यतीन् यजेहम् ॥

ओ३म ह्रीं देवशास्त्रगुरुभ्यो मोक्षफलप्राप्तये फल निर्वपामीति स्वाहा ।

सद्वारि-गन्धाक्षतपुष्पजातै नैवेद्यदीपामलधूपधूम्रैः ।
फलैर्विचित्रै र्घन पुण्य योगान् जिनेन्द्र सिद्धान्त यतीन् यजेहम् ॥

ओ३म् ह्रीं देवशास्त्रगुरुभ्यो अनर्घ्य-पद प्राप्तयेअर्घ्य निर्वपामीति स्वाहा ।

ये पूजां जिननाथ शास्त्रयमिनां भक्त्या सदा कुर्वते,
त्रैसन्ध्यं सुविचित्र काव्य रचनामुच्चारयन्तो नराः ।
पुण्याढ्या मुनिराजकीर्ति सहिता भूत्वास्तपो-भूषणा
स्ते भव्या सकलावबोधरुचिरा सिद्धिं लभन्ते पराम्

(इत्याशार्वाद:)

जिने भक्तिर्जिने भक्तिर्जिने भक्तिः सदास्तु मे
सम्यक्त्वमेव संसारवारणं मोक्षकारणं ।
श्रुते भक्तिः श्रुते भक्तिः श्रुते भक्तिः सदास्तु मे
सज्ज्ञानमेव संसारवारणं मोक्षकारणं ।
गुरौ भक्तिर्गुरौ भक्तिर्गुरौ भक्तिः सदास्तु मे
चारित्रमेव संसारवारणं मोक्षकारणं ॥

("ॐ देवशास्त्रगुरुभ्यो नम" १०८ या ६ जाप)

सिद्ध पूजा

ऊर्ध्वाधोरयुतं सबिन्दु सपर ब्रह्मस्वरा-वेष्टितं
वर्गा-पूरित दिग्गताम्बुजदलं तत्सन्धि-तत्वान्वितम् ।
अन्तः पत्रतटेष्वनाहतयुतं-ह्रींकार संवेष्टितं
देवं ध्यायति यः म मुक्ति-सुभगो वैरीभकण्ठीरवः ॥

ॐह्रीं श्री सिद्धचक्राधिपते ! सिद्ध परमेष्ठिन् !
अत्र अवतर अवतर सवौषट् ।
ॐह्रीं श्री सिद्धचक्राधिपते ! सिद्ध परमेष्ठिन् !
अत्र तिष्ट तिष्ट ठ: ठ ।
ॐह्रीं श्री सिद्धचक्राधिपते ! सिद्ध परमेष्ठिन् !
अत्र मम सन्निहितो भव भव वषट् । (स्थापनम्)

निरस्त-कर्म-सम्बन्धं सूक्ष्मं नित्यं निरामयम् ।
वन्देऽहं परमात्मानममूर्त्तमनुपद्रवम् ॥ १ ॥

[सिद्धयन्त्र की स्थापना]

(भावाष्टक)	(द्रव्याष्टक)
निजमनोमणिभाजनभारया,	सिद्धौ निवासमनुगं परमात्मगम्यं,
समरसैकसुधारसधारया।	हान्यादिभावरहितं भववीतकायम्।
सकलबोधकलारमणीयकं,	रेवापगावरसरो यमुनोद्भवानां
सहजसिद्धमहंपरिपूजये॥	नीरैर्यजे कलशगैर्वरसिद्धचक्रम्

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने जन्मजरामृत्यु विनाशनाय जलं निर्वपामीति स्वाहा।

सहजकर्मकलंकविनाशनै	आनन्दकन्दजनकं घनकर्ममुक्तं,
रमलभावसुवासितचन्दनैः।	सम्यक्त्व शर्मगरिमंजननार्तिवीतम्।
अनुपमानगुणावलिनायक,	सौरभ्य-वासित-भुवं हरिचन्दनानां
सहजसिद्धमहं परिपूजये॥	गन्धैर्यजे परिमलैर्वरसिद्धचक्रम्

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने भवाताप विनाशनाय चन्दनं०॥

सहजभाव सुनिर्मलतन्दुलैः,	सर्वावगाहन गुणं सुसमाधिनिष्ठं
सकलदोषविनाशविशोधनैः।	सिद्धं स्वरूप निपुणंकमलंविशालं।
अनुपरोधसुबोध निधानकं	सौगन्ध्यशालिवनशालिवराक्षतानाम्
सहजसिद्धमहं परिपूजये॥	पुंजैर्यजे शशिनिभैर्वर सिद्धचक्रम्।

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अक्षयपद-प्राप्तये अक्षतान् निर्वपामीतिस्वाहा।

समयसारसुपुष्पसुमालया,	नित्यं स्वदेह परिमाणमनादिसंज्ञं,
सहजकर्मकरेणविशोधया।	द्रव्यानपेक्षममृतं मरणाद्यतीतम्।
परमयोगवलेनवशीकृतं,	मन्दार-कुन्द-कमलादि-वनस्पतीनां
सहजसिद्धमहंपरिपूजये॥	पुष्पैर्यजे शुभतमैर्वरसिद्धचक्रम्

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने कामबाणविध्वंसनाय पुष्प० ।

अकृतबोधसुदिव्यनिवेद्यकै,
विहितजातजरामरणान्तकै ।
निरवधिप्रचुरात्मगुणालय
सहजसिद्धमह परिपूजये ॥

ऊर्द्ध-स्वभाव-गमनं सुमनोव्यपेतं
ब्रह्मादिबीज सहितं गगनावभासम् ।
क्षीरान्न साज्यवटकै रसपूर्ण-गर्भैः
नित्यं यजे चरुवरैर्वरसिद्धचक्रम् ॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने क्षुधारोगविनाशनाय नैवेद्यं० ।

सहजरत्न रुचि प्रतिदीपकैः,
रुचिविभूतितमः प्रविनाशनै ।
निरवधिस्वविकाशविकाशनै.,
सहजसिद्धमहं परिपूजये ॥

आतङ्क-शोक-भय रोग-मद प्रशान्तं
निर्द्वन्द्व-भावधरणं महिमानिवेशम् ।
कर्पूरवर्ति बहुभिः कनकावदातै-
र्दीपैर्यजे रुचिवरैर्वरसिद्धचक्रम् ॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने मोहांधकार विनाशनाय दीपं०

निजगुणाक्षयरूपसुधूपकै,
स्वगुणघातिमलप्रविनाशनैः ।
विशदबोधसुदीर्घसुखात्मकं,
सहजसिद्धमहं परिपूजये ॥

पश्यन्समस्तभुवनं युगपन्नितान्तं
त्रैकाल्यवस्तु विषये निविडप्रदीपम् ।
सद्द्रव्य गन्ध घनसारविमिश्रितानां
धूपैर्यजे परिमलैर्वरसिद्धचक्रम् ॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अष्टकर्मदहनाय धूपं० ।

परमभावफलावलिसम्पदा,
सहजभावकुभावविशोधया ।
निजगुणास्फुरणात्मनिरंजन,
सहजसिद्धमहं परिपूजये ।

सिद्धासुराधिपति-यक्ष नरेन्द्र-चक्रै-
र्ध्येयं शिवमचलभव्यजनैःसुवन्द्यम् ।
नारिङ्ग-पुंग-कदली-फल-नारिकेलैः
सोऽहंयजे वर-फलैर्वरसिद्धचक्रम् ।

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने मोक्षफलप्राप्तये फलं० ।

नेत्रान्मीलि विकाशभावनिवहैरत्यन्तबोधायवै
वार्गन्धाक्षतपुष्पदामचरुकैः सद्दीपधूपैः फलैः।
यश्चिन्तामणिशुद्धभावपरम ज्ञानात्मकैरर्चये
सिद्ध'स्वादुमगाधबोधमचलं सचर्चयामो वयम् ॥

गन्धाढ्यं सुपयोमधुव्रतगणै, सङ्ग वरं चन्दनं
पुष्पौघं विमलं सदक्षतचयं रम्यं चरुं दीपकम् ।
धूपं गन्धयुतं ददामि विविधं श्रेष्ठं फलं लब्धये
सिद्धानां युगपत्क्रमाय, विमलं मेनोतरं वांछितम् ॥

ॐह्रीं श्री सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अनर्घ्यपदप्राप्तये अर्घ्यं ।

ज्ञानोपयोग विमलं विशदात्मरूपं । सूक्ष्म स्वभाव परमं यदनन्तवीर्यम् ।
कर्मौघकक्षदहनं सुखशस्यबीजम् । वन्देसदानिरूपमम् वरसिद्धचक्रम् ॥

त्रैलोक्येश्वर वन्दनीय चरणाः प्रापुः श्रियं शाश्वतीं
यानाराध्य निरुद्धचण्डमनसः सन्तोपितीर्थंकराः ।
सत्सम्यक्त्व विबोध वीर्यविशदाऽव्याबाधताद्यैर्गुणै
र्युक्तांस्तानिह तोष्टवीमि सततं सिद्धान् विशुद्धोदयान् ॥

ॐह्रीं सिद्धचक्राधिपतये सिद्ध परमेष्ठिने महार्घ्यं निर्वपामिति स्वाहा

(पुष्पाञ्जलि क्षेपण)

जयमाल

विराग सनातन शांत निरंश, निरामय निर्भय निर्मल हंस
सुधाम विबोध निधान विमोह, प्रसीद विशुद्धसुसिद्धसमूह ॥१॥
विदूरित संसृत भाव निरंग, समामृत पूरित देव विसंग
अबन्ध कषाय विहीन विमोह, प्रसीद विशुद्ध सुसिद्धसमूह ॥२॥

निवारित दुष्कृत कर्म विपाश, सदामल केवल केलिनिवास।
भवोदधि पारग शान्त विमोह, प्रसीद विशुद्ध सुसिद्धसमूह ॥३॥
अनन्तसुखामृत सागर धीर, कलंकरजोमल भूरिसमीर।
विखण्डित काम विराम विमोह, प्रसीद विशुद्ध सुसिद्ध समूह ॥४॥
विकार विवर्जित तर्जितशोक, विबोध सुनेत्र विलोकितलोक।
विहार विराव विरंग विमोह, प्रसीद विशुद्ध सुसिद्ध समूह ॥५॥
रजोमलखेदविमुक्त विगात्र, निरन्तर नित्य सुखामृत पात्र।
सुदर्शनराजित नाथ विमोह, प्रसीद विशुद्ध सुसिद्धसमूह ॥६॥
नरामरवन्दित निर्मलभाव, अनन्त मुनीश्वर पूज्यविहाव।
सदोदय विश्व महेश विमोह, प्रसीद विशुद्ध सुसिद्धसमूह ॥७॥
विदंभ वितृष्ण विदोष विनिद्र, परापर शंकर सार वितन्द्र।
विकोप विरूप विशंक विमोह, प्रसीद विशुद्ध सुसिद्ध समूह ॥८॥
जरामरणोज्झित वीतविहार, विचिन्तित निर्मल निरहंकार।
अचिन्त्य चरित्र विदर्प विमोह, प्रसीद विशुद्ध सुसिद्धसमूह ॥९॥
विवर्ण विगन्ध विमान विलोभ, विमाय विकाय विशब्द विशोभ।
अनाकुल केवल सार्व विमोह, प्रसीद विशुद्ध सुसिद्ध समूह ॥१०॥

असमसमयसारं चारुचैतन्यचिह्नं
परपरणति मुक्तं पद्मनन्दीन्द्रवन्द्यम्।
निखिलगुणनिकेतं सिद्धचक्रं विशुद्धं
स्मरति नमति यो वा स्तौति सोऽभ्येति मुक्तिम्॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अनर्घ्यपदप्राप्तये महा अर्घ्यं निर्वपामीति स्वाहा

अविनाशी अविकार परमरसधाम हो,
समाधान सर्वज्ञ सहज अभिराम हो,
शुद्ध बुद्ध अविरुद्ध अनादि अनंत हो,
जगत शिरोमणि सिद्ध सदा जयवंत हो ॥
ध्यान अग्नि कर कर्मकलंक सबै दहै,
नित्य निरंजन देव सरूपी हो रहे,
ज्ञायक के आकार ममत्व निवारिके,
सो परमातम सिद्ध नमूं सिर नाय के ॥
अविचल ज्ञान प्रकाशते, गुण अनन्त की खान ।
ध्यान धरे सो पाइये, परम सिद्ध भगवान ॥

(इत्याशीर्वादः)

("ॐ नमो सिद्धाणं" जाप १०८ या ९)

प्रकीर्णक अर्घ

उदक-चन्दन-तन्दुल-पुष्पकै श्चरुसुदीप सुधूप फलार्घकैः ।
धवल मङ्गलगानरवाकुले, जिनगृहे जिनचन्द्रमहं यजे ॥

ॐ ह्रीं श्रीचन्द्रप्रभ जिनेन्द्राय गर्भ जन्म तप ज्ञान मोक्ष कल्याणकाय अर्घ्यम् निर्वपामीति स्वाहा

उदक-चन्दन-तन्दुल-पुष्पकैश्चरुसुदीपसुधूपफलार्घकैः ।
धवलमङ्गलगानरवाकुले, जिनगृहे जिनपार्श्वमहं यजे ॥
ॐ ह्रीं श्री पार्श्वनाथ जिनेन्द्राय श्रावण सुदी सप्तम्यां मोक्ष मंगल प्राप्ताय अर्घ्यं निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीपसुधूपफलार्घकै ।
धवलमङ्गलगानरवाकुले, जिनगृहे जिनदेवमहं यजे ॥
ॐ ह्रीं श्रीविद्यमान विंशति तीर्थंकरेभ्यो अर्घ्यं निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीपसुधूप फलार्घकै ।
धवलमंगलगानरवाकुले, जिनगृहे जिनक्षेत्रमहं यजे ॥
ॐ ह्रीं श्री सम्मेदशिखर - गिरनार - चपापुर - पावापुर - कैलाश सुकल्याणकभूमयश्च सप्ततिशत क्षेत्रेभ्यो अर्घ्यं निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीप सुधूपफलार्घकैः ।
धवलमंगलगानरवाकुले, जिनगृहेजिनबिम्बमहं यजे ॥
ॐह्रीं श्रीपचमेरु सम्बन्धो चैत्याल्यस्थ, नदीश्वरद्वीपे द्वी पंचाशत्-जिनालयस्थ कृत्रिम अकृत्रिम् चैत्यालयस्थ जिन बिम्बेभ्यो अर्घं निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीपसुधूपफलार्घकैः ।
धवलमंगलगानरवाकुले, जिनगृहे जिनहेतु महंयजे ॥
ॐ ह्रीं दर्शनाविशुद्धयादि षाडसकारणेभ्यो अर्घ्यम निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीपसुधूपफलार्घकैः ।
धवल मंगलगानरवाकुले, जिनगृहे जिनधर्ममहं यजे ॥

ॐ ह्रीं श्री अर्हन्मुखकमलसमुद्भूता उत्तमक्षमामार्दव आर्जव शौच सत्य-संयम-तप-त्याग-आकिंचन-ब्रह्मचर्याणि दशलक्षणिकधर्मेभ्यो अर्घ्यं निर्वपामीति स्वाहा

उदकचन्दनतन्दुलपुष्पकै श्चरुसुदीप सुधूपफलार्घकैः ।
धवल मंगलगानरवाकुले, जिनगृहे जिनरत्नमहं यजे ॥

ॐ ह्रीं अष्टागसम्यकदर्शनाय अष्टविधसम्यकज्ञानाय त्रयोदश प्रकार सम्यक चारित्राय अर्घ्यं निर्वपामीति स्वाहा

शान्ति पाठ

शान्तिजिनंशशीनिर्मलवक्त्रं शीलगुणव्रतसंयमपात्रं,
अष्टशतार्चितलक्षणगात्रं, नौमि जिनोत्तमम्बुजनेत्रं ।
पंचममीप्सितचक्रधराणां, पूजितमिन्द्रनरेन्द्रगणैश्च,
शान्तिकरं गणशान्तिमभीप्सुः, षोडसतीर्थकरं प्रणमामि ॥
दिव्यतरुः सुर पुष्प सुवृष्टि दुंन्धुभिरासनयोजनघोषौ,
आतपवारणचामरयुग्मे, यस्य विभाति च मंडलतेजः ।
तं जगदर्चित शान्तिजिनेन्द्रं शान्तिकरं शिरसा प्रणमामि,
सर्वगणाय तु यच्छतु शान्ति मह्यमरं पठते परमां च ॥

येभ्यर्चितामुकुटकुंडलहाररत्नैः,
शक्रादिभिः सुरगणैस्तुतपादपद्माः ।
ते मे जिनाःप्रवरवंशजगतप्रदीपा
स्तीर्थकराः सतत शान्तिकरा भवन्तु ॥

संपूजाकानां प्रतिपालकानां यतीन्द्रसामान्यतपोधनानाम् ।
देशस्यराष्ट्रस्य पुरस्य राज्ञः करोतु शान्तिं भगवान् जिनेन्द्रः ॥
(चन्दन की धारा डालनी चाहिये)

क्षेमं सर्वप्रजानां प्रभवतु बलवान् धार्मिको भूमिपालः,
काले काले च सम्यगवर्षतु मघवा व्याधयो यान्तु नाशम् ।
दुर्भिक्षं चौर मारि क्षणमपि जगतां मास्मभूज्जीवलोके,
जैनेन्द्रं धर्म चक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ॥
(पुष्पांजलि क्षेपण)

प्रध्वस्त घातिकर्माणा केवलज्ञानभास्कराः ।
कुर्वन्तु जगत शान्ति, वृषभाद्या जिनेश्वराः ॥
प्रथमं करणं चरणं द्रव्यं नमः ।
शास्त्राभ्यासो जिनपतिनुतिः सङ्गतिः सर्वदार्यैः,
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ।
सर्वस्यापि प्रियहितवचो भावना चात्मतत्वे,
सम्पद्यन्तां मम भव भवे यावदेतेपवर्गः ॥
तव पादौ मम हृदये मम हृदय तव पादद्वये लीनम्
तिष्ठतु जिनेन्द्र तावद्यावत् निर्वाणसम्प्राप्तिः ॥
अक्खर पयत्थ हीणं मत्ताहीणं च जं मया भणियं,
तं खमऊ णाणदेव मज्भ वि दुक्खक्खयं दिंतु ।
दुक्खक्खओ कम्मक्खओ समाहिमरणं च बोहिलाहोय,
मम होऊ जगत बंधव जिनवर तव चरणसरणेण ॥

४६२

विसर्जन पाठः

ज्ञानतोऽज्ञानतो वापि शास्त्रोक्तं न कृतं मया,
तत्सर्वं पूर्णमेवास्तु त्वत् प्रमादात् जिनेश्वरः।
आह्वानं नैव जानामि नैव जानामि पूजनम्,
विसर्जनं नैव जानामि क्षमस्व परमेश्वरः ॥
मंत्रहीनं क्रियाहीनं द्रव्यहीनं तथैव च,
तत्सर्वं क्षम्यताम् देव रक्ष रक्ष जिनेश्वरः ॥
आहुता ये पुरा देवाः लब्धभागा यथाक्रमम
ते मयाभ्यर्चिता भक्त्या सर्वे यान्तु यथास्थितिम् ॥

पचंमेरु पूजा

तीर्थङ्करों के न्हवनजलतैं, भये तीरथ शर्मदा,
तातें प्रदक्षन देत सुरगन, पचंमेरन की सदा।
दो जलधि ढाई दीप में सब, गनतमूल विराजहीं,
पूजों असी जिनधाम प्रतिमा, होहि सुख, दुख भाजहीं ॥

ॐ ह्रीं श्रीपञ्चमेरुसम्बन्धि चत्यालयस्थ जिनप्रतिमा समूह। अत्र अवतर अवतर सवौंषट। अत्र तिष्ट तिष्ट ठः ठः। अत्र मम सन्निहितो भव भव वषट्। (स्थापनम्)

सीतल मिष्ट सुवास मिलाय, जल सों पूजों श्री जिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥

पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धो चैत्यालयस्थ जिनबिम्बेभ्यो जलं० ॥
जल केसर करपूर मिलाय, गंध सों पूजों श्री जिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥
पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करो परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरु सम्बंधी चैत्यालयस्थ जिनबिम्बेभ्य चन्दनं० ।
अमल अखण्ड सुगन्ध सुहाय, अक्षत सों पूजों जिनराय,
महा सुख होय, देखे नाथ परम सुख होये ॥
पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करूं परनाम ।
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरु सम्बन्धी चैत्यालयस्थ जिनबिम्बेभ्यो अक्षतान निर्वपामीति स्वाहा ।
वरन अनेक रहे महकाय, फूलन सों पूजों जिनराय,
महा सुख होय, देखे नाथ मरम सुख होय ॥
पांचों मेरु असि जिन धाम, मब प्रतिमा जी को करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धो चैत्यालयस्थ जिनबिम्बेभ्यो पुष्पं० ।
मन वांछित बहु तुरत बनाय, चरु सों पूजों श्री जिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥

पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धी चैत्यालयस्थ जिनबिम्बेभ्यो नैवेद्यं० ।
तम हर उज्जल जोति जगाय, दीप सों पूजों श्रीजिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥
पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धी चैत्यालयस्थ जिनबिम्बेभ्यो दीप ० ।
खेऊं अगर परिमल अधिकाय, धूप सों पूजूं श्रीजिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥
पांचों मेरु असि जिन धाम, सब प्रतिमा जी को करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धी चैत्यालयस्थ जिनबिम्बेभ्यो धूप० ।
सुरस सुवर्ण सुगन्ध सुभाय, फल सों पूजूं श्री जिनराय,
महा सुख होय, देखे नाथ परम सुख होय ॥
पांचों मेरु असि जिन धाम सब प्रतिमा जी की करूं परनाम ।
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरुसम्बन्धी चैत्यालयस्थ जिनबिम्बेभ्यो फल० ।
आठ दरबमय अर्घ बनाय । द्यानत पूजूं श्री जिनराय ।
महा सुख होय, देखे नाथ परम सुख होय ॥
पांचों मेरु असि जिन धाम, सब प्रतिमा जी की करूं परनाम,
महा सुख होय, देखे नाथ परम सुख होय ॥
ॐ ह्रीं पञ्चमेरु सम्बन्धी चैत्यालयस्थ जिन बिम्बेभ्यो अर्घ्यं० ।

जयमाल

प्रथम सुदर्सन स्वामि, विजय अचल मन्दिर कहा
विदूयुन माली नाम, पंचमेरु जग में प्रगट ॥१॥
प्रथम सुदर्शन मेरु विराजे, भद्र साल बन भूपर छाजे ।
चैत्यालय चारों सुखकारी, मन बच तन वन्दना हमारी ॥२॥
ऊपर पंच शतक पर सोहे, नन्दन वन देखत मन मोहे ।
चैत्यालय चारों सुखकारी, मन बच तन बंदना हमारी ॥३॥
साढे बासठ सहस उंचाई, बन सुमनस शोभे अधिकाई ।
चैत्यालय चारों सुखकारी, मन बच तन बंदना हमारी ॥४॥
ऊंचा जोजन सहस छतीसं, पाडुक बन सोहै गिरि सीसं ।
चैत्यालय चारों सुखकारी, मन बच तन बंदना हमारी ॥५॥
चारों मेरु समान बखाने, भूपर भद्रसाल चहुं जाने ।
चैत्यालय सोलह सुखकारी, मन बच तन बंदना हमारी ॥६॥
ऊंचे पांच शतक पर भाखे, चारों नंदन बन अभिलाखे ।
चैत्यालय सोलह सुखकारी, मन बच तन बंदना हमारी ॥७॥
साढ़े पचपन सहस उतंगा, वन सौमनस चार बहुरंगा ।
चैत्यालय सोलह सुखकारी, मन बच तन बंदना हमारी ॥८॥
ऊँचे अट्ठाइस सहस बताये, पांडुक चारों बन शुभ गाये ।
चैत्यालय सोलह सुखकारी, मन बच तन बंदना हमारी ॥९॥
सुर नर चारन बंदन आवें, सो सोभा हम किह मुख गावें ।
चैत्यालय अस्सी सुखकारी, मन बच तन बंदना हमारी ॥१०॥

पंच मेरु की आरती, पढ़ै सुने जो कोय।
द्यानत फल जाने प्रभू, तुरत महा सुख होय ॥ ११ ॥
ॐ ह्रीं पचमेरु सम्बन्धिचैत्यालयस्थ जिनविम्बेभ्य अर्घ्यं० ।
("ॐ ह्रीं पंचमेरु चैत्यालयस्थ जिनविम्बेभ्य: नम." जप
१०८ या ६)

श्री नन्दीश्वर पूजा

सरब परब में बड़ो अठाई परब है,
नंदीश्वर सुर जाहिं लेय बसु दरब है।
हमें सकति जो नाहि इहां करि थापना।
पूजों जिनग्रह प्रतिमा, है हित आपना।

ॐ ह्रीं श्री नन्दीश्वरद्वीपेद्विपंचाशज्जिनालयस्थ जिन प्रतिमा समूह, अत्र अवतर अवतर संवौषट् । अत्र तिष्ठ तिष्ठ ठ ठ । अत्र मम सन्निहितो भव भव वषट् ॥ (इति स्थापनम्)

कंचन मणिमय भृंगार, तीरथ नीर भरा,
तिहुँ धार दयी, निरवार, जन्मन मरन जरा।
नंदीश्वर श्री जिनधाम, बावन पुंज करो,
वसु दिन प्रतिमा अभिराम, आनंद भाव धरो॥

ॐ ह्रीं श्रीनन्दीश्वर द्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्या (इतना मंत्र प्रत्येक अष्टक के अन्तमें बोलना चाहिए) जन्मजरामृत्युविनाशनाय जल निर्वपामीतिस्वाहा॥

भव तप हर शीतलवास, सो चंदन माहीं।
प्रभु यह गुन कीजे सांच, आयो तुम ठाहीं॥

नंदीश्वर श्री निज धाम, बावन पुंज करो ।

वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो भवातापविनाशनाय चन्दनं निर्वपामीति स्वाहा ।

उत्तम अक्षत जिनराज, पुंज धरे सोहैं ।

सब जीते अक्ष समाज, तुम सम अरु कोहैं ॥

नंदीश्वर श्रीजिनधाम, बावन पुंज करो ।

वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो अक्षयपदप्राप्तये अक्षतान्० ॥

तुम काम विनाशक देव. ध्याऊँ फूलन सौं ।

लहि शील लक्ष्मी एव, छूटूँ सूलन सौं ॥

नंदीश्वर श्री जिनधाम, बावन पुंज करो ।

वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो कामबाणविध्वंसनाय पुष्पं० ।

नेवज इंद्रिय बलकार, सो तुमने चूरा ।

चरु तुम ढिग सोहै सार, अचरज है पूरा ॥

नंदीश्वर श्रीजिनधाम, बावन पुंज करो ।

वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो क्षुधारोग विनाशनाय नैवेद्यं० ॥

दीपक की ज्योति प्रकाश, तुम तन माँहि लसे।
टूटे करमन की राशि, ज्ञान कणी दरसे ॥
नंदीश्वर श्रीजिनधाम, बावन पुंज करो।
वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्री नन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिन प्रतिमाभ्यो मोहान्धकारविनाशनाय दीपं० ॥

कृष्णागरु धूप सुवास, दशदिशि नारि वरे।
अति हरष भाव परकाश, मानों नृत्य करे ॥
नंदीश्वर श्रीजिनधाम, बावन पुंज करो।
वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्री नन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिन प्रतिमाभ्यो अष्ट कर्म दहनाय धूप० ॥

बहु विध फल ले तिहुँकाल, आनंद राचत है।
तुम शिव फल देहु दयाल, तो हम जाचत हैं ॥
नंदीश्वर श्री-जिन-धाम, बावन पुंज करो।
वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्री नन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिन प्रतिमाभ्यो मोक्षफल प्राप्तये फल० ॥

यह अरघ कियो निज हेतु, तुमको अरपत हूं।
'द्यानत' कीनो शिवखेत, भूपै समरपत हूं ॥
नंदीश्वर श्री-जिन-धाम, बावन पुंज करो।
वसु दिन प्रतिमा अभिराम, आनंद भाव धरो ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो अनर्घ्य पदप्राप्तये अर्घ्यं० ॥

कार्तिक फागुन साढ़ के, अंत आठ दिन माँहिं।
नंदीश्वर सुर जात हैं, हम पूजैं इह ठाहिं ॥१॥

एक सौ त्रेसठ कोडि जोजन महा।
लाख चौरासिया एक दिश में लहा॥
आठवों द्वीप नंदीश्वरं भास्वरं ।
भवन बावन्न प्रतिमा नमो सुखकरं ॥२॥

चार दिशि चार अंजन गिरिं राजहीं।
सहस चौरासिया एक दिश छाजहीं॥
ढोल सम गोल ऊपर तले सुंदरं।
भवन बावन्न प्रतिमा नमो सुखकरं ॥३॥

एक एक चार दिशि चार शुभ बावरी।
एक एक लाख जोजन अमल जल भरी।
चहुं दिशा चार बन लाख जोजन वरं।
भवन बावन्न प्रतिमा नमो सुखकरं ॥४॥

सोल वापीन मधि सोल गिरि दधिमुखं।
सहस दश महा जोजन लखत ही सुखं॥
बावरी कोन दो माहिं दो रतिकरं।
भवन बावन्न प्रतिमा नमो सुखकरं ॥५॥

शैल बतीस इक सहस जोजन कहे ।
चार सोलै मिलै सर्व बावन लहै ॥
एक एक सीस पर एक जिन मंदिरं ।
भवन बावन्न प्रतिमा नमो सुखकरं ॥६॥
बिंब आठ एक सौ रतनमई सोहही ।
देव देवी सनगन मन मोहही ॥
पाच सै धनुष तन पद्म आसन परं ।
भवन बावन्न प्रतिमा नमो सुखकरं ॥७॥
लाल नख मुख नयन स्याम अरु स्वेत है ।
स्याम रंग भौंह सिर केश छबि देत हैं ॥
बचन बोलत मनों हंसत कालुष हरं ।
भवन बावन्न प्रतिमा नमो सुखकरं ॥८॥
कोटि शशि भानुदुति तेज छिप जात है ।
महा वैराग परिणाम ठहरात है ॥
बयन नहीं कहैं लखि होत सम्यकधरं ।
भवन बावन्न प्रतिमा नमो सुखकरं ॥९॥
नंदीश्वर जिन धाम, प्रतिमा महिमा को कहै ॥
'द्यानत' लीनों नाम यही भगति सब सुख करै ॥१०॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वपश्चिमोत्तरदक्षिणे द्विपञ्चाशज्जिनालयस्थ जिनप्रतिमाभ्यो पूर्णार्घ्यं निर्वपामीति स्वाहा: ।

———

सोलह कारण पूजा

सोलह कारण भाय जे तीर्थंकर भये ।
हरषे इन्द्र अपार मेरु पै ले गये ॥
पूजा करि निज धन्य लख्यो बहु चाव सों ।
हमहूँ षोडशकारण भावैं भाव सों ॥१॥

ॐ ह्रीं दर्शनविशुद्धयादि षोडशकारणानि ! अत्र अवतर अवतर सवौषट । अत्र तिष्ठ तिष्ठ ठ. ठ । अत्र मम सन्निहितो भव भव वषट् । (स्थापनम्)

कंचनझारी निर्मल नीर पूजूं जिनवर गुणगंभीर ।
परमगुरु हो, जय जय नाथ परमगुरु हो ॥१॥
दर्श विशुद्ध भावना भाय । सोलह तीर्थंकर पदपाय ।
परम गुरु हो, जय जय नाथ परमगुरु हो ॥

